5.1.3

# राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

(केन्द्रीयविश्वविद्यालयः)

## संस्कृतविकासकेन्द्रम्

# बालगोकुलस्य प्रतिवेदनम्

2020

अद्यतनाः बालाः विद्यालयेषु यद्यपि भाषाः पठन्ति, तथापि भाषासम्बद्धान् सांस्कृतिकान् विषयान्, देशभक्तानां जीवनचरित्राणि वा ज्ञातुम् अवसरं न प्राप्नुवन्ति । यतः विद्यालयस्य पाठ्यांशाः एव अधिकाः भवन्ति । अद्यतने विद्यालयशिक्षणे गृहपाठलेखनस्य अतिप्राधान्यम् आगतमस्ति । एतावद्गृहपाठलेखनं बालानां सर्जनशीलतां सङ्कुचितां करोति, मनोविकासं अवरोधयति च । अत एव अद्यतनाः बालाः गृहपाठ-लेखनरहितानि विरामदिनानि सर्वदा निरीक्षमाणाः भवन्ति ।

अतः तादृशं किञ्चित् शिक्षणम् आवश्यकं यत्र भारतीयसंस्कृतिसम्बद्धान् विचारान् पाठयितुं व्यवस्था स्यात्, देशभक्तानां जीवनचरित्राणि श्रोतुम् अवसरः च स्यात्, यत्र च अनौपचारिकं शिक्षणं स्यात् यत्र च परीक्षायाः गृहपाठस्य वा भारः बालानां मनसि भयं न जनयेत्, यत्र च बालाः मातुः उत्सङ्ग इव उत्साहेन हसन्तः क्रीडन्तः एव अस्माकं संस्कृतिसम्बद्धान् विचारान् जानीयुः इत्येतस्याः कल्पनायाः मूर्तः आकारः एव " बालगोकुलम् " ।

अद्यतने आधुनिकयुगे संस्कृतिः क्षीयमाणा वर्तते । तस्याः पुनरुज्जीवनाय समर्थाः अद्यतनाः बालाः एव । अद्यतनबालाः एव भारतस्य निर्माताः इति मन्वानाः तिरुपतिस्थस्य राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतयः आचार्याः वि.मुरलीधरशर्मवर्याः बालगोकुलस्य आरम्भम् अकार्षुः। बालेभ्य जीवनस्य मूल्यं, भारतस्य संस्कृतेः विषये परिकल्पनाय एनं सङ्कल्पम् अकुर्वन्।

बालगोकुलकक्ष्या केवलं भारतीयानां भानुवासरे भवति एवं वैदेशिकानां सोमवासरे प्रातः 4:30 वादने भवति । भारतीयच्छात्राणां गणत्रयं विद्यते । वैदेशिकानामेकः गणः वर्तते । भारतीयकालानुगुणं कक्ष्यायाः समयः एवं वर्तते

| अनु.क्र. | गणः | समयः | छात्रसंस्ख्या |
|---|---|---|---|
| 1. | प्रथमः गणः | 10 to 11:30 am | 28 |
| 2. | द्वितीयः गणः | 3 to 4:30 pm | 48 |
| 3. | तृतीयः गणः | 7 to 8:30 pm | 48 |
| 4. | वैदेशिकानां गणः | 4:30 to 6 am | 50 |

बालगोकुले न केवलं संस्कृतसम्भाषणमेव पाठयन्ति अपि तु श्लोकान्, सङ्ख्याः, संस्कृतगीतानि, नित्यपञ्चाङ्गम् (मासानां, नक्षत्राणां नामानि इत्यादिनि), भाषाक्रीडाः, कथाः, संस्कृतसम्भाषणम् एवं विभिन्नान् विषयान् पाठयन्ति । कक्ष्यायां विभिन्नोपकरणाम् (तन्त्रांशानां) उपयोकं कुर्वन्ति ।

अत्र पाठनार्थं संस्कृतभारत्याः बालकेन्द्रम् इत्यस्य पुस्तकस्य पाठ्यक्रमस्य अनुसरणं कृतवन्तः । बालगोकुलं १:३० होरात्मिका 50 अवधयः भवन्ति ।

2020 अस्मिन् शैक्षिकवर्षे जुलैमासे १५ दिनाङ्के बालगोकुलस्य आरम्भः अभवत् । एतत् एकवर्षस्य योजना विद्यते । बालगोकुले न केवलं भारतीयाः छात्राः पठन्ति अपि तु चतुर्दशदेशतः 50 छात्राः अधीयते । भारतदेशस्य विभिन्नेभ्यः प्रान्तेभ्यः 124 छात्राः अधीयते । बालगोकुले 174 छात्राः संस्कृतम् अधीयते ।

तेषां विवरणम् एवम् अस्ति । यथा -

| अनु.क्र. | देशस्य नाम | छात्रसङ्ख्या |
|---|---|---|
| 1. | Australia | 5 |
| 2. | Bahrain | 1 |
| 3. | Canada | 2 |
| 4. | Fairfax | 1 |
| 5. | Germany | 1 |
| 6. | Manama | 1 |
| 7. | Saudi Arabia | 3 |
| 8. | Singapore | 2 |
| 9. | UAE | 2 |
| 10. | UK | 2 |
| 11. | US | 6 |
| 12. | USA | 24 |
| 13. | Bharath (India) | 124 |
| | Total | 174 |

सङ्कायप्रमुखः/DEAN
आचार्यः प्रह्लाद रा. जोशी/Prof. Pralhad R. Joshi
शिक्षासङ्कायः/School of Education
राष्ट्रियसंस्कृतविश्वविद्यालयः/National Sanskrit University
तिरुपतिः/Tirupati-517507 (A.P.)